शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजित् ॥”

इति भावप्रकाशः ॥

शाखः, त्रि, शाखासम्बन्धी। शाखाशब्दात् ष्णप्रत्ययेन निष्पन्नमेतत् ॥

शाङ्करं, क्ली, (शङ्कर + अण्।) छन्दोभेदः। इति मेदिनी ॥ अस्य रूपान्तरं शाक्करं शाक्वरञ्च ॥ (शङ्करो देवतास्य इत्यर्थे अणि आर्द्रानक्षत्रम्। यथा, बृहत्संहितायाम्। ७१। ७।

“स्वगे तु मूत्रकाङ्गयं वसुत्वमेव शाङ्करे ॥”)

शाङ्करः, पुं, (शङ्करस्यायं वाहनत्वात्। शङ्कर + अण्।) बलीवर्द्दः। इति मेदिनी ॥ (शङ्करसम्बन्धिनि, त्रि। यथा, कथासरित्सागरे। ४६। २०१।

“तत्रैषां तद्गुहाद्वारप्राप्तानां शाङ्करा गणाः ॥”)

शाङ्करिः, पुं, (शङ्करस्यापत्यं पुमान्। शङ्कर + इञ्।) कार्त्तिकेयः। गणेशः। इति मेदिनी ॥

शाङ्कुची, स्त्री, शङ्कोचनमत्स्यः। इति शब्दरत्नावली ॥

शाङ्खः, त्रि, शङ्खसम्बन्धि। शङ्खशब्दात् ष्णप्रत्ययेन निष्पन्नमेतत् ॥

शाङ्खिकः, पुं, (शङ्खकरणं शिल्पमस्य इति। शङ्ख + ठक्।) जातिविशेषः। शाँखारि इति भाषा। तत्पर्य्यायः। काम्बविकः २। इत्यमरः ॥ शङ्खकारः ३ काम्बुजकः ४। इति शब्दरत्नावली ॥ शङ्खवादकः। तत्पर्य्यायः। शङ्खध्माः २। इति जटाधरः ॥

शाङ्गुष्ठा, स्त्री, गुञ्जा। इति रत्नमाला ॥

शाटः, पुं, वस्त्रभेदः। इत्यमरभरतौ ॥ यथा,—

“दूरतः शोभते मूर्खो लम्बशाटपटावृतः।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥”

इति चाणक्यशतकम् ॥

शाटकः, पुं क्ली, (शाट + स्वार्थे कन्।) पटः। (यथा, कथासरित्सागरे। ५३। ३८।

“स राजवन्दिनामा तद्दत्त्वा शाटकमग्रहीत् ॥”)

नाटकभेदः। इत्यमरभरतौ ॥

शाटिका, स्त्री, शाटी। इत्यमरटीकायां भरतः ॥

शाटी, पुं स्त्री, वस्त्रभेदः। शाड़ी इति भाषा। इत्यमरः ॥ अस्या निर्माणत्वं निर्माणशब्दे द्रष्टव्यम् ॥

शाट्यायनं, क्ली, प्रकृतकर्म्मवैगुण्यप्रशमनार्थहोमः। यथा। यत्तु प्रकृतकर्म्मवैगुण्यप्रशमनाय शाट्यायनहोमाभिधानं भवदेवभट्टसम्मतं तन्न प्रामाणिकं तस्मादपि महाप्रामाणिकैर्भट्टनारायणचरणैर्गोभिलभाष्ये तदप्रमाणीकृतत्वात्। छन्दोगपरिशिष्टेऽपि प्रायश्चित्तार्थं प्रकारत्रयमात्रमुक्तम्। यथा,—

“यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत्।
चतस्रस्तत्र विज्ञेया स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुतिः।
होतव्या त्रिर्व्विकल्पोऽयं प्रायश्चित्तविधिः स्मृतः ॥”

त्रिर्व्विकल्प इत्यनेन कल्पान्तरनिषेधात् गोभिलीयकर्म्मणि शाट्यायनहोमो न युक्तः। किन्तु व्यस्तसमस्तमहाव्याहृतिभिश्चतसृभिः प्रायश्चित्तहोमो युक्तः। विशारदप्रभृतयोऽप्येवम्। शाट्यायनहोमस्य समूलत्वेऽपि शाखान्तरीयत्वम्। इति तिथ्यादितत्त्वम् ॥

शाट्यायनः, पुं, मुनिविशेषः। इति पुराणम् ॥

शाठ्यं, क्ली, (शठस्य भावः। शठ + ष्यञ्।) शठता। (यथा। “शठे शाठ्यं समाचरेत् ॥”) तत्पर्य्यायः। कपटः २ व्याजः ३ दम्भः ४ उपधिः ५ छद्म ६ कैतवम् ७ कुसृतिः ८ निकृतिः ९। इत्यमरः ॥ नव अयथार्थव्यवहारे। शठ वधे श्लेषकैतवे तालव्यादिः अल् तस्य कर्म्म शाठ्यं ष्यः। कपटादिषट्कं छद्मनि कुसृत्यादित्रयं चित्तकौटिल्ये इत्येके। कपटादिषट्कं वचनमात्रफलम्। कुसृत्यादित्रिकन्तु हिंसाफलमिति भेदः। इति सर्व्वानन्दो मधुश्च। नवैवैकार्था इति बहवः। इति भरतः ॥ अपि च।

“अस्त्रियां कपटो व्याज उपधिर्दम्भ एव च।
कूटं कल्कं छलं छद्म मिथकैरवकैतवम् ॥
अथ शाठ्यञ्च शठता कुसृतिर्निकृतिश्च सा।
हिंसाफले चतुष्कं स्यात् शाठ्यपर्य्याय ईरितः ॥
पूर्व्वः कपटपर्य्यायः फले वचनमात्रके।
उभयोरेकपर्य्याय इति केचित् प्रचक्षते ॥”

इति शब्दरत्नावली ॥

शाड, ऋ ङ श्लाघे। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अशशाड़त्। ङ, शाड़ते गुणिनं गुणी। अन्तःस्थतृतीयमुक्तादिरयमिति कस्यचिद्भ्रमः। इति दुर्गादासः ॥

शाड्वलः, पुं, शाद्वलः। इति केचित् ॥

शाणं, क्ली, (शणेन निर्म्मितमिति। शण + अण्।) शणनिर्म्मितवस्त्रम्। यथा। क्षौमं शाणं वा ब्राह्मणस्य कार्पासं क्षत्त्रियस्य आविकं वैश्यस्य। क्षुमा अतसी तस्या इदं क्षौमं तसरादि। शाणं शणतन्तुभवं तदुभयं ब्राह्मणस्य। इति संस्कारतत्त्वम् ॥

शाणः, पुं, (शाण्यते ज्ञायते गुणादिरत्रेति। शण + घञ्।) कषपट्टिका। कष्टिपातर इति भाषा। तत्पर्य्यायः। निकषः २ कषः ३। इत्यमरः ॥ शानः ४ निकसः ५ कसः ६। इति भरतः ॥ आकषः ७। इति शब्दरत्नावली ॥ माषचतुष्टयम्। चारि माषा इति भाषा। तत्पर्य्यायः। निष्कः २ टङ्कः ३। इति वैद्यकपरिभाषा ॥ यथा,—

“माषैश्चतुर्भिः शाणः स्यात् धरणः स निगद्यते।
टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते ॥”

इति भावप्रकाशः ॥

लौहादीनां निकषः। शानपातर इति भाषा। इति मेदिनी ॥ करपत्रम्। करात् इति भाषा। इति विश्वः ॥

शाणाजीवः, पुं, (शाणेन आजीवतीति। आ + जीव + अच्।) अस्त्रमार्जकः। यथा,—

“शाणाजीवः शस्त्रमार्जो भ्रमासक्तोऽसिधावकः ॥”

इति हेमचन्द्रः ॥

शाणिः, पुं, पट्टरचः। यथा,—

“पट्टराजशणः शाणिस्त्रिभिः कक्खटपत्रकः ॥”

इति शब्दमाला ॥

शाणितः, त्रि, तीक्ष्णीकृतः। निशितः। कृतशाणः। शाणशब्दादितप्रत्ययेन निष्पन्नमेतत् ॥

शाणी, स्त्री, (शणस्य विकारः। शण + अण्। टिड्ढेति ङीप्।) शणसूत्रमयी पट्टिका। यथा,—

“शाणीप्रायाणि वस्त्राणि शमीप्राया महीरुहाः।
शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ॥”

इति विष्णुपुराणे ६ अंशे १ अध्यायः ॥

शाणी शणसूत्रमयी पट्टिका तत्तुल्यानि वस्त्राणि। इति तट्टीका ॥ (यथा, महाभारते। ३। १६४। १६।

“वस्त्राणां प्रवरा शाणी धान्यानां कोरदूषकः ॥”)

प्रावरणान्तरम्। ताम्बु इति भाषा। इति मेदिनी ॥ छिद्रवस्त्रम्। यथा। शाणी गोणी छिद्रवस्त्रे। इति हेमचन्द्रः ॥ हस्तकटाक्षादिसूचना। इशारा इति पारस्यभाषा। इति शब्दरत्नावली ॥

शाणीरं, क्ली, शोणनदमध्यस्थतटः। दर्द्दरीनदीतटः। इति विश्वः ॥

शाण्डिल्यः, पुं, बिल्ववृक्षः। इत्यमरः ॥ (यथा, महागणपतिस्तोत्रे। ९।

“हेरम्बं प्रणमामि यस्य पुरतः शाण्डिल्यमूले श्रिया
बिभ्रत्याम्बुरुहे समं मधुरिपुस्ते शङ्खचक्रे वहन् ॥”)

वह्निभेदः। (शण्डिलस्य मुनेर्गोत्रापत्यमिति। शण्डिल + “गर्गादिभ्यो यञ्।” ४। १। १०५। इति यञ्।) मुनिविशेषः। इति मेदिनी ॥ स तु गोत्रकारः भक्तिसूत्रकारश्च। तत्सूत्रभाष्याद्यश्लोको यथा,—

“प्रपद्य परमं देवं श्रीस्वप्नेश्वरसूरिणा।
शाण्डिल्यशतसूत्रीयं भाष्यमाभाष्यतेऽधुना ॥”

शातं, क्ली, (शो + क्तः। “शाच्छोरन्यतरस्याम्।” ७। ४। ४१। इति पक्षे इत्वाभावः।) सुखम्। तद्वति, त्रि। इत्यमरः ॥ (विनाशः। यथा, सुश्रुते। ४। १।

“पाणिप्राप्तं पाणिदाहं नखशातं करोति च ॥”)

शातः, त्रि, (शो + क्तः।) दुर्ब्बलः। निशितः। इति मेदिनी ॥ धुस्तूरः। इत्यमरः ॥

शातकुम्भं, क्ली, (शातकुम्भे पर्व्वते भवम्। शातकुम्भ + अण्।) काञ्चनम्। (यथा, माघे। ६। ६।